# Chidambarashivadhvani Stava

# ચિદમ્બરશિવધ્વનિસ્તવઃ

## Document Information

Text title : Chidambarashivadhvani Stava

File name : chidambarashivadhvanistavaH.itx

Category : shiva

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From shrInaTarAjastavamanjarI

Latest update : July 10, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 28, 2023

*sanskritdocuments.org*

# ચિદમ્બરશિવધ્વનિસ્તવઃ

શ્રીગણેશાય નમઃ ।
શ્રીચિત્સભેશાય નમઃ ।
ૐ શિવ શિવ શરણં શિવાનન્દ શિવ
શિવ શિવાય શિવાય નમઃ ।
ઓઙ્કારમોષધીશાનચૂડમોજસ્વિદૂરગમ્ ।
ઓડ્યાણપીઠનિલયં વન્દે શ્રીચિત્સભાપતિમ્ ॥ ૧॥

શિખિવાહસુતં દેવં શિષ્ટાર્ચિતપદામ્બુજમ્ ।
શિખાવન્તં મહાદેવં વન્દે શ્રીચિત્સભાપતિમ્ ॥ ૨॥

વરુણાઘ પ્રહન્તારં વરદં વરરૂપિણમ્ ।
વન્દારુજનમન્દારં વન્દે શ્રીચિત્સભાપતિમ્ ॥ ૩॥

શિલાદસુતવન્દ્યાઙ્ઘ્રિં શિરોધૃતસુરાપગમ્ ।
શિખિરાજત્ભાલદેશં વન્દે શ્રીચિત્સભાપતિમ્ ॥ ૪॥

વનમાલ્યર્ચિતપદં વંશવૃદ્ધિકરં નૃણામ્ ।
વસુધારથવામોમં વન્દે શ્રીચિત્સભાપતિમ્ ॥ ૫॥

શરચ્ચન્દ્રસમાનાભં શરણં જગતાં સદા ।
શઙ્ખચક્રકરાન્વિષ્ટં વન્દે શ્રીચિત્સભાપતિમ્ ॥ ૬॥

રણન્મઞ્જીરપાદાબ્જં રજતાચલવાસિનમ્ ।
રમ્ભાદિફલભોક્તારં વન્દે શ્રીચિત્સભાપતિમ્ ॥ ૭॥

ણશક્તિપદમૃગ્યાઙ્ઘ્રિં ગણનાથસુતં વિભુમ્ ।
ફણાભૃન્નાથવરદં વન્દે શ્રીચિત્સભાપતિમ્ ॥ ૮॥

શિવાલિઙ્ગિતવર્ષ્માણં શિવરુદ્રાદિસંજ્ઞકમ્ ।
શિવં શિવકરં નૃણાં વન્દે શ્રીચિત્સભાપતિમ્ ॥ ૯॥

વારાશિતનયાનાથનેત્રાર્ચિતપદામ્બુજમ્ ।
વારિજાતાસને સંસ્થં વન્દે શ્રીચિત્સભાપતિમ્ ॥ ૧૦॥

નન્દનસ્થિતમન્દારવૃક્ષસ્યૌદાર્યદાયિનમ્ ।
નન્ધ્યાદિભિસ્સદા સેવ્યં વન્દે શ્રીચિત્સભાપતિમ્ ॥ ૧૧॥

દણ્ડપાણિહરં દેવં દણ્ડપાણિં દયાનિધિમ્ ।
દણ્ડોદ્દણ્ડનટં ચણ્ડં વન્દે શ્રીચિત્સભાપતિમ્ ॥ ૧૨॥

શિષ્યલોકં શિરોરત્નભૂષણં શિખિધારિણમ્ ।
શિવદાતારમીશાનં વન્દે શ્રીચિત્સભાપતિમ્ ॥ ૧૩॥

વપુષા ભાસયન્તં તત્ જગત્સર્વં ચરાચરમ્ ।
વજ્રપાણ્યાદિસંસેવ્યં વન્દે શ્રીચિત્સભાપતિમ્ ॥ ૧૪॥

શિશું મુનિવરસ્યાદૌ રક્ષન્તં યમશાસનાત્ ।
શિપિવિષ્ટં શિલાદાર્ચ્યં વન્દે શ્રીચિત્સભાપતિમ્ ॥ ૧૫॥

વલારિતપસા પ્રીતં વટમૂલનિવાસિનમ્ ।
વટુકૈરાવૃતપ્રાન્તં વન્દે શ્રીચિત્સભાપતિમ્ ॥ ૧૬॥

શિખરે શિખરીન્દ્રસ્ય વસન્તં શ્રિતપાલકમ્ ।
શિખાગ્રે યોગિનાં સંસ્થં વન્દે શ્રીચિત્સભાપતિમ્ ॥ ૧૭॥

વારાણસ્યાદિમે ક્ષેત્રે વસન્તં વાયુરૂપિણમ્ ।
વાલ્કલિક્ષયહેતું તં વન્દે શ્રીચિત્સભાપતિમ્ ॥ ૧૮॥

યમાદ્યષ્ટાઙ્ગવિલસદ્યોગવત્સ્વાન્તગોચરમ્ ।
યક્ષરાક્ષસવૃન્દેડ્યં વન્દે શ્રીચિત્સભાપતિમ્ ॥ ૧૯॥

શિઞ્જન્નૂપુરપાદાબ્જં શિલાદસુતસન્નુતમ્ ।
શિવાદિસંજ્ઞં શિવદં વન્દે શ્રીચિત્સભાપતિમ્ ॥ ૨૦॥

વારણાસ્યષડાસ્યાદ્યૈરાવૃતં શઙ્કરં વિભુમ્ ।
વાસવાદ્યખિલૈરર્ચ્યં વન્દે શ્રીચિત્સભાપતિમ્ ॥ ૨૧॥

યમુનાસખિભર્તારં યમહન્તારમવ્યયમ્ ।
યજનપ્રિયમમ્બેશં વન્દે શ્રીચિત્સભાપતિમ્ ॥ ૨૨॥

નરાણામિષ્ટદાતારં નક્રકુણ્ડલભૂષિતમ્ ।
નમદાનન્દદં નિત્યં વન્દે શ્રીચિત્સભાપતિમ્ ॥ ૨૩॥

મહાન્તં મણિભૂષાઢ્યં મતિમદ્ભિરુપાસિતમ્ ।
મહાકવિપ્રદં વેદ્યં વન્દે શ્રીચિત્સભાપતિમ્ ॥ ૨૪॥

ઇમં ધ્વનિસ્તવં નિત્યં પઠતાં નટસન્નિધૌ ।
ઇહ ભુક્તિં પ્રદત્વાઽન્તે મુક્તિં યચ્છતિ શઙ્કરઃ ॥ ૨૫॥

ઇતિ શ્રીચિદમ્બરશિવધ્વનિસ્તવઃ સમ્પૂર્ણઃ ।

Proofread by Aruna Narayanan

---

*Chidambarashivadhvani Stava*

pdf was typeset on June 28, 2023

Please send corrections to *sanskrit@cheerful.com*